# संस्कृतसाहित्ये नैपालमिथिलाक्षेत्रस्य योगदानम्

गणेशपाण्डेयः (विद्यावारिधिः)
सहप्राध्यापकः साहित्य विभाग
नेसंवि, जनताविद्यापीठस्य, बिजौरी, दाङ, नेपाल
Email : gpw2024@gmail.com

(**सारसङ्क्षेपः** *सूर्यवंशीयराज्ञो निमेः शरीरमन्थनाज्जातेन मिथिनाम्ना राज्ञा प्रवर्तितत्वात् तदीया राजधानी मिथिलेति प्रसिद्धिमुपगता । मिथिलायाः सीमासङ्कोचविस्तारयोर्जातेऽपि प्रकृताध्ययने नेपालस्य साम्प्रतिकः द्विसङ्ख्यकः प्रदेशः मिथिलाक्षेत्रत्वेन गृहीतः । मिथिलाराज्यस्य सीमायाः परिवर्तने दृष्टेऽपि मिथिलासंस्कृते राजधानी जनकपुरं वर्तते । मिथिलायां वैदिककाले विश्वामित्रप्रभृतयो ऋषयो दृश्यन्ते । तेषु महर्षिर्याज्ञवल्क्यः सर्वाधिक्येन प्रदीप्तं मिथिलायाः प्रोज्ज्वलं रत्नं वर्तते । अर्वाचीनेषु कविषु वंशमणिशर्मा हरिकेलिमहाकाव्यमाध्यमेन सर्वोत्कृष्टं स्थानं लभते । मिथिलायां स्फुटरूपेण संस्कृतकवितारचनायाः परम्परा सम्प्रत्यपि जीविता वर्तते ।)*

**शब्दकुञ्जी :** मिथिला, गवाक्षम्, भावात्मकसौन्दर्यम्, शैली विश्वगुरुत्वम् ।

## विषयपरिचयः

संस्कृतसाहित्ये विविधभूभागमधिवसतां प्रतिभावतां महनीयं योगदानं विद्यते । मिथिलाक्षेत्रे संस्कृतभाषायां वैदिककालादारभ्य खीष्टस्य सप्तदशशतकं यावद् वाङ्मयस्य बह्वीषु शाखासु विद्वद्भिः सामूहिकरूपेण वैयक्तिकरूपेण च बह्व्यो रचनाः प्रस्तुताः । संस्कृते काव्यप्रणयनस्य परम्परा तु समयप्रभावेण विरला सत्यपि मिथिलायामद्यावधि प्रचलन्ती दृश्यते । पुरा काले मिथिलाराज्यरूपेण परिचिते साम्प्रतिकनेपालदेशान्तर्वर्तिनि द्विसङ्ख्यकप्रदेशे निवसतां कवीनां संस्कृतसाहित्ये कृतस्य योगदानस्य सम्प्रतियावत् सामग्र्येणाध्ययनस्याभावः प्रकृतानुसन्धानकर्मणः प्रयोजिका मुख्या समस्या वर्तते । अस्याः समस्यायाः प्राज्ञिकं समाधानमुद्देश्यं वर्तते । तेन मिथिलाक्षेत्रान्तर्वर्तिनां सम्प्रति भार तस्य विहारराज्यान्तर्गतेषु भूभागेषु निवसतां तथा तात्कालिकप्राचीनमिथिलाया रामेछापप्रभृतिषु पर्वतीयभूभागेषु निवसतां कवीनाञ्च योगदानं प्रकृतशोधकार्ये न कृतम् । अध्ययनेऽस्मिन् वैदिककालादारब्धा संस्कृतकाव्यप्रणयनपरम्परा नैपालमिथिलाभूमौ सम्प्रत्यपि जीविता वर्तत इति प्राक्कल्पना कृता । तदर्थं ऋग्वेदीयमन्त्राणां द्रष्टुर्महर्षेर्विश्वामित्रादारभ्य अमृतनाथमिश्रपर्यन्तानां वाङ्मयसाधकानां प्रतिनिधिगतयोगदानस्यैतिहासिकदृशा सर्वेक्षणं विधाय प्राप्तसामग्रीणां विश्लेषणेन तथ्यमुद्घाटितम् । अस्य शोधकर्मण उपलब्धिर्हि नैपालमिथिलाक्षेत्रस्य संस्कृतसाहित्ये योगदानसम्बद्धं समग्रतायामध्ययनं वर्तते । अनेन भाविनामनुसन्धित्सूनां मार्गः प्रशस्तो भविष्यति ।

## अध्ययनविधिः

प्रकृताध्ययनं सैद्धान्तिकधरातलेऽवलम्बितमिति मूलतः पुस्तकालयेषूपलब्धानां सामग्रीणाम् अध्ययनेन सम्पादितम् । तदर्थं तत्तत्कवीनां ग्रन्थाः स्फुटरचनाश्च प्राथमिकस्रोतस्त्वेन प्रयुक्ताः । अथ च क्वाचित्कतयोपलब्धानि विभिन्नविदुषां सान्दर्भिकान्यध्ययनानि तथा शशिनाथझाप्रभृतीनां विदुषां प्रत्यक्षवार्तयोपलब्धानि वचनानि च सामग्रीरूपेण प्रयुक्तनि । एवं प्राप्ततथ्यानां विश्लेषणेन विषयस्य सम्पुष्ट्यै यथावश्यकमुदाहरणानि च प्रदाय निष्कर्षोऽवतारितः । तदत्र मुख्यरूपेण निगमनात्मको विधिरवलम्बितः ।

## सैद्धान्तिकाधारः

अध्ययनमेतत् ऐतिहासिकविषयसम्बद्धमिति ऐतिहासिकदृशा परिपुष्टानां तथ्यानां सङ्कलनेन, मिथिलासंस्कृते राजधान्या जनकपुरस्य विभिन्नस्थलीनां प्रत्यक्षावलोकनेन तज्ज्ञानां विदुषां वचनप्रामाण्येन च निष्पादितम् । अत एव क्रमनिर्धारणसन्दर्भे सङ्कलितसामग्रीणामैतिकहासिकाधारः सिद्धान्तरूपेण गृहीतः । रचनानां गुणवत्तायाः परीक्षणे उदाहरणमुखेन काव्यशास्त्रीयप्रामाण्यं प्रस्तुत्य विश्लेषणं कृतमिति काव्यशास्त्रीयनिर्णयः सैद्धान्तिकाधाररूपेणावलम्बितः ।

## मिथिलाया नामकरणं भूक्षेत्रञ्च

मिथिलाया नामकरणसम्बन्धे विदुषां धारणा भिद्यन्ते । तत्रैका प्राचीनतमा धारणा विष्णुपुराणे प्राप्यते । तदनुसारेण इक्ष्वाकुतनयो निमिर्नाम राजा सहस्रवार्षिकं यज्ञं चिकीर्षुराचार्यत्वग्रहणाय कुलगुरुं वसिष्ठमनुरुद्धवान् । वसिष्ठस्तु 'अहं देवराजस्य पञ्चशतवार्षिकं यज्ञं समाप्य तव यज्ञं सम्पादयिष्यामि' इत्युक्त्वा इन्द्रस्य यज्ञसम्पादनार्थं स्वर्लोकं जगाम । भूतले यज्ञाय सन्नद्धो निमिः मुनेर्गौतमस्याचार्यत्वे यज्ञमारेभे । देवेन्द्रस्य यज्ञं समाप्य यजमानसमक्षमागतो वसिष्ठो स्वस्यानुपस्थितावपि यज्ञं जायमानं वीक्ष्य नैजमवमानमवधारयन् क्रुद्धो निमये सद्यो मरणरूपं शापं ददौ । निमिरपि स्वं निरपराधं मन्यमानो वसिष्ठाय तादृशमेव शापं ददानो गुरोः शापप्रभावात् निश्चेष्टतया पपात । मध्येयज्ञं मृते यजमाने विप्रा निमेः शरीरमौषधादिभिर्यथाकथञ्चित् संरक्ष्य यज्ञं पूरयामासुः । यज्ञसमाप्तौ देवेभ्यः सर्वेषां प्राणिनां नयनेषु निवासरूपं स्वाभीष्टं वरमासाद्य शरीरं पूर्णतया त्यक्तवति राजनि राज्ञोऽभावे देशेऽराजकतां सम्भाव्य मुनयो निमेरनपत्यत्वात् तदीयं शरीरमरण्या निर्मथ्य कुमारमुत्पादयामासुः । स एव कुमारो मन्थनाज्जातत्वात् 'मिथि'नाम्ना प्रसिद्धो बभूव (आचार्यः, १९७५, ४/५/१–२३) । ततो मिथिनाम्ना राज्ञा प्रवर्तितत्वात् तदीया राजधानी मिथिलेति प्रसिद्धिमुपगता ।

इदमेवाख्यानकं किञ्चिद् भिन्नरूपेण श्रीमद्देवीभागवतमहापुराणेऽपि प्राप्यते । तदनुसारं वसिष्ठेन शप्तस्य निमेर्मरणानन्तरं यज्ञस्यासमाप्तिं सम्भावयन्तो मुनयो यज्ञसमाप्तिं यावत् मन्त्रबलेन निमेः शरीरं रक्षयाम्बभूबुः । यज्ञसमाप्तौ भगवत्या वरेण प्राणिनां नयनेषु निवासरूपे तदभीप्सितवरे लब्धे तदीयं शरीरं निर्मथ्य मुनयो राजकुमारमुत्पादयामासुः । मन्थनाज्जातत्वात् तस्य नाम मिथिरिति बभूव । तस्यैवापरे नामनी जनको विदेहश्चेत्यपि बभूवतुः–*"अरण्या मथनाज्जातस्तस्मान्मिथिरिति स्मृतः । येनायं जनकाज्जातस्तेनासौ जनकोऽभवत् ॥"* (ढकालः, २०७३, ६/१५/२६) । राज्ञा मिथिना गङ्गातीरे रमणीया नगरी निर्मिता । सा एव

नगरी देशस्य राजधानी अजायत । तदाह– *"एवं निमिसुतो राजा प्रथितो जनकोऽभवत् । नगरी निर्मिता तेन गङ्गातीरे मनोहरा ॥ मिथिलेति.....॥"* (ढकालः, २०७३, ६/१५/२८–२९) । एतदाख्यानं श्रीमद्भागवतेऽपि प्राप्यते । तत्र निमेराचार्यस्य नाम न निर्दिष्टम् । केवलं *"ऋत्विग्भिरपरैः..."* इत्युक्तम् । देवीभागवते तु गौतमस्य नामोल्लेखः प्राप्यते । मिथिलाया नामकरणसम्बन्धेऽपि तथैव निर्दिष्टम्– *"अराजकभयं नृणां मन्यमाना महर्षयः । देहं ममन्थु स्म निमेः कुमारः समजायत ॥ जन्मना जनकः सोऽभूद् वैदेहस्तु विदेहजः । मिथिलो मथनाज्जातो मिथिला येन निर्मिता ॥"* (महर्षिवेदव्यासः, २०१०, ९/१३/१२–१३) । भविष्यप्रभृतिषु पुराणान्तरेषु चैवंविधान्येव समाख्यानानि प्राप्यन्ते । उपचर्चितरूपेणेमामेव पौराणिकीं गाथामाधाररूपेण गृहीत्वा विद्वांसः कोशीयार्थमपि प्रवर्तयन्ति (भट्टाचार्यः, १९७०, ४७५३) ।

केचन विद्वांसो राज्ञो जनकस्य राजधान्यां नित्यं जायमानं ब्रह्मविद्याविषयकं शास्त्रार्थं विभाव्य *'मथ्यन्तेऽत्र शास्त्राणि रिपवश्च'* इति विग्रहेण विलोडनार्थकाद् भौवादिकात् *'मन्थ'*धातोः *"मिथिलादयश्च"* इत्यौणादिकसूत्रेणेलच्प्रत्ययं निष्पाद्य टावन्तं रूपं सिषाधयिषन्ति (बरालः, २०६८, ५९७) । एवं द्विधैव निष्पन्नस्य रूपस्य विचारे मिथिलायाः सम्बन्धः प्राचीनतमेन राज्ञा मिथिना सम्बध्यते ।

मिथिलाया भूक्षेत्रं समयेन सङ्कोचविस्ताराभ्यां परिवर्तनशीलं दृश्यते । पूर्वोद्धृतस्य श्रीमद्देवीभागवतमहापुराणस्य साक्ष्येण मिथिला नगरी गङ्गायास्तीरे स्थापितेति ज्ञायते । तेन भूक्षेत्रस्य विषये सङ्केते विहितेऽपि राज्यस्य सीमासम्बन्धे किमपि तथ्यं नोद्घाट्यते । विष्णुपुराणे मिथिलाराज्यस्य सीमा पूर्वे कौशिकी-(कोसी)-नदीपर्यन्तम्, पश्चिमायां गण्डकी-(नारायणी)-पर्यन्तम्, उत्तरे हिमालयपर्यन्तं दक्षिणे गङ्गानदीपर्यन्तं निबद्धं प्राप्यते । राज्यस्यास्य पूर्वपश्चिमयोः २४ योजनेषु (९६ क्रोशः) उत्तरदक्षिणयोः सीमा १६ योजनेषु (६४ क्रोशः) विस्तृतमासीदिति गवेषकाणां निष्कर्षः प्राप्यते (पन्थी, मिथिला र मैथिली, १, अप्रकाशितं कार्यपत्रम्) । शक्तिसङ्गमतन्त्रस्य साक्ष्यनिर्देशनपुरस्सरं शब्दकल्पद्रुमे तात्कालिक्या मिथिलाया भौगोलिकी सीमा सूचिता प्राप्यते– *"गण्डकीतीरमारभ्य चम्पारण्यान्तकं शिवे ! विदेहभूः समाख्याता तैरभुक्ताभिधः स तु ॥"* (स्याऱराजा राधाकान्तदेवबहादुरः, २०१५) । अत्रोक्तं तैरभुक्तपदं जनभाषायामुच्यमानस्य तिरहुतशब्दस्य संस्कृतं रूपं वर्तते । एवं समयेन सीमायाः सङ्कोच-विस्ताराभ्यां भौगोलिकरूपस्य परिवर्तने दृष्टेऽपि स्थिररूपेण मिथिलासंस्कृते राजधानी जनकपुरनगरी मिथिलाराज्यस्यापि केन्द्रं वर्तते ।

## मिथिलासम्बद्धाः प्रागैतिहासिका मुनयः

मिथिलाक्षेत्रसम्बद्धे शीर्षकेऽस्मिन् कवीनां समयाधारेण कवयोऽपि प्राचीनतमाः, मध्यकालिकाः साम्प्रतिका इति त्रिषु खण्डेषु विभज्याध्येतुं शक्यन्ते । प्राचीनमुनीनां रचनासूपदेशस्य, निर्देशनस्य समाख्यानस्य वा प्राधान्ये काव्यकलाया अनुगमनं दृश्यते चेत् मध्यकालिकेष्वाधुनिकेषु च कविषु काव्यकलायाः प्राधान्येऽन्यतत्त्वानामनुगमनं दृश्यते । अत एव प्रकृतेऽनपेक्षितविस्तरभिया तादृशं विभाजनमकृत्वा केवलं प्राचीनार्वाचीनयोराधारेण विभज्याधीतम् । तत्र कालक्रमानुसारेण प्राचीनानां पूर्वोपस्थितिविषयत्वात् प्रथमं तेषामध्ययनं पुरस्क्रियते ।

**(क) विश्वामित्रः**

पौराणिकवाङ्मयाधारेण सप्तर्षिष्वन्यतमो महर्षिर्विश्वामित्रः परिव्राजक आसीत् । अस्याख्यानं वाल्मीकीयरामायणे, महाभारते पुराणेषु च प्राप्यते । तस्य बहुष्वाश्रमेषु कतिचन तपःसाधनाऽऽश्रमाः, कतिचन ब्रह्मर्षिपदप्राप्तये कृतानां सङ्घर्षाणां गाथाश्रयाः कतिपये सामान्याश्रमा बभूवुः । तेषां विस्तरेण विवरणं वाल्मीकीयरामायणे वर्तते । प्रकृते विश्वामित्रस्य मिथिलासम्बन्धित्वस्य सम्पुष्ट्यै तस्य कौशिकीतटीयः आश्रमश्चर्चाया विषयो वर्तते ।

इक्ष्वाकुवंशीयेऽरुणनामके राजनि भुवं शासति विश्वामित्रः परिवारं गेहे सुरक्षितरूपेण संस्थाप्य तपोविधानार्थं कौशिक्यास्तीरमाश्रितवानित्युल्लेखः प्राप्यते । यथा– *"विश्वामित्रस्तदा दारांस्तस्मिंस्तु विषये नृपः । सन्न्यस्य कौशिकीतीरे चचार विपुलं तपः ॥"* (ढकालः, २०७३, ७/१०/२४) । विश्वामित्रः कुशवंशोत्पन्न आसीदिति स कौशिकनाम्ना च प्रथते । ब्रह्मणः पुत्रः कुशः, तस्य पुत्रः कुशनाभः, तस्य च पुत्रो गाधिस्तत्पुत्रो विश्वामित्र इति तस्य वंशपरम्पराधारः । तेन स विश्वामित्र-कौशिक-गाधेयप्रभृतिनामभिरुच्यते । तस्य भगिनी कौशिकी, सत्यवती गाधिसुतेति नामभिः पुराणेषु चर्चिता । सांसारिकजीवनस्य समाप्तौ शरीरं त्यजन्त्याः कौशिक्याः शरीरं पातिव्रत्यधर्मस्य प्रभावात् नदीरूपेण परिणता । सा एव कौशिकी नदी वर्तत इति विदुषां निष्कर्षो वर्तते (पन्थी, २०६२, २७) । मुनिर्विश्वामित्रो भगिनीस्नेहेन प्रायः कौशिकीतटीयम् आश्रममधिवसतिस्म (पन्थी, २०६२, २७) । इत्थं यदि विश्वामित्रः कौशिक्याः पश्चिमतटे मध्यदेशीये भूभागे वसति स्मेत्यङ्गीक्रियते तर्हि तस्य मैथिलत्वं स्वीकर्तुं शक्यते । तथा सति विश्वामित्रस्य ऋग्वेदीयमन्त्राणां द्रष्टृत्वात् मानवजगतः आद्यतमाया ज्ञानराशेः सम्पादने मिथिलाक्षेत्रस्य महनीयं योगदानं वर्तत इति साधयितुं शक्यते ।

**(ख) याज्ञवल्क्यः**

योगीन्द्रस्य याज्ञवल्क्यस्य सम्बन्धे तद्रचितेषु शतपथब्राह्मण-याज्ञवल्क्यस्मृतिप्रभृतिषु प्रसिद्धग्रन्थेषु, रामायणमहाभारतयोः पुराणेषु च महत्त्वपूर्णाः सङ्केताः प्राप्यन्ते । तेषां संश्लेषणेन तस्येतिवृत्तं ज्ञातुं शक्यते । एकस्यानुसारेण मुनिरयं प्रथमं साम्प्रतिकभारतस्य गुर्जरप्रान्तस्य *चमत्कारपुरं वृद्धनगरं* वा वसति स्म । राज्ञो जनकस्य देशिकपदाङ्गीकरणानन्तरं मिथिलानगरीमे अध्युषितवानिति कस्यचिन्मान्यतावर्तते (शर्मा, १९४०, २६) किन्तु तस्य गुर्जरदेशोत्पन्नत्वे शर्म्मण उल्लेखादृते किमपि शास्त्रीयं प्रमाणं न प्राप्यते । याज्ञवल्क्यो विश्वामित्रस्य वंश्यो देवरात-चारायण-ब्रह्मरात-यज्ञवल्क-वाजसनिरित्यादिभिर्नामभिः प्रख्यातस्य ऋषेः पुत्र आसीत् । स मुनेश्चारायणस्य यज्ञियाग्नेरुत्पन्न इति च मतः प्राप्यते (शर्मा, १९४०,, २६) । तस्य माता सुनन्दा नाम्नी आसीत् । तस्य जन्मदिनसम्बन्धे विदुषां विभिन्ना धारणाः प्राप्यन्ते । तत्र केचन ज्येष्ठशुक्लदशमीम्, अन्ये कार्तिकशुक्लनवमीम् अपरे फाल्गुनशुक्लपञ्चमीं जन्मतिथिं मन्यन्ते (शर्मा, १९४०, २६) ।

याज्ञवल्क्यः सुतीक्ष्णस्वभावो मेधावी मानधनश्चासीदिति तस्य जीवने घटिताभिर्घटनाभिः सहजरूपेणैव ज्ञातुं शक्यते । प्रथमं शाकल्यमुनेर्ऋग्वेदमधीतचरः स आनर्तराजस्य कृते गुरुणा भर्त्सिततत्वात् तस्मादधीतं वेदमुद्गीर्य पुनरध्ययनाय मातामहसम्बन्धिनो मुनेर्वृद्धवैशम्पायनाद् यजुर्वेदम् अधीतवान् । तत्रापि केनचित्

कारणेन गुरुणा भर्त्सितः स तस्मादधीतं यजुर्वेदमप्युद्गीर्णवान् । ततो मानुषं गुरुं रागादिदोषावर्जितं मत्वा गायत्रीपुरश्चरणादिविधिना भगवन्तं सूर्यमुपास्य त्रयीमयात् सूर्यात् श्रावणशुक्लचतुर्दशीविद्धायां पूर्णिमायां मध्याह्ने चतुरो वेदानधिजगे (शर्मा, १९४०, २६) । गुरुरूपधारिणः सूर्याद् विद्यामधिगम्य लोकाचारानुसारेण गुरुदक्षिणां समर्प्य सन्न्यासं ग्रहीतुकाम आसीत् किन्तु गुरोर्नियोगात् कियत्कालपर्यन्तं सन्न्यासग्रहणं निरुध्य प्रथमं मैत्रेय्या ततः कात्यायन्या सहोद्वाह्य गार्हस्थं सञ्चालयामास । गृहस्थाश्रममाश्रयता याज्ञवल्क्येन सूर्यादधिगतानां चतुर्णां वेदानां शिष्य-प्रशिष्यमण्डल्या नैकाः शाखा विस्तारिताः । एवं याज्ञवल्क्येन वेदाधिगमानन्तरं शतपथ-ब्राह्मणं शिष्याणां मण्डल्यामुपदिश्य याज्ञवल्क्यस्मृतिर्याज्ञवल्क्यगीता च प्रणीत इति ज्ञायते (शर्मा, १९४०, २६) । शर्म्मणोऽध्ययनमिदं प्राचीनपरम्परायाः प्रातिनिध्यं करोति । याज्ञवल्क्यस्मृतेः मिताक्षराटीकाकारः स्मृते रचयिता याज्ञवल्क्यमुनेः कश्चिच्छिष्य आसीदित्युल्लिखति– *"याज्ञवल्क्यशिष्यः कश्चित् प्रश्नोत्तररूपं याज्ञवल्क्यप्रणीतं धर्मशास्त्रं कथयामास"* (मिश्रः, २०४७, १३) । मिताक्षराकारस्य मतम् ए. बी. कीथोऽपि समर्थयति (मिश्रः, २०४७, १३) ।

प्राचीनतायाः पक्षावलम्बी सन्नपि कौण्डिन्न्यायनो मिताक्षराकारवचनमनुमोदते (२०४८, १) । किन्तु भूयांसः प्राचीनतायाः पक्षपातिनो विद्वांसो याज्ञवल्क्यस्मृते रचयिता शतपथब्राह्मणस्य प्रवक्ता याज्ञवल्क्य एवेति मन्यन्ते । भाषिकभिन्नताऽऽधारेणेक्षणपराः कीथप्रभृतयोऽपरे तच्छिष्यनिर्मितं मन्यन्ते । वस्तुतो विवादोऽयं व्यर्थ एव, यतः साम्प्रतिकयाज्ञवल्क्यस्मृते रचयिता यदि कोऽपि याज्ञवल्क्यशिष्यो मन्येत तथापि प्रश्नोत्तररूपाया मूलस्मृतेर्याज्ञवल्क्यरचयितृत्वे उभयोरेव मतयोग्राह्यं दृश्यते । तदवस्थायां याज्ञवल्क्यस्य स्मृतिकर्तृत्वं सिद्ध्यत्येव । समस्ताया स्मृतेर्याज्ञवल्क्यरचयितृत्वे प्रबलतरम् अन्तःसाक्ष्यमपि प्राप्यते । यथा– *"योगीश्वरं याज्ञवल्क्यं सम्पूज्य मुनयोऽब्रुवन् । वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः ॥ मिथिलास्थः स योगीन्द्रः क्षणं ध्यात्वाऽब्रवीन्मुनीन् ॥"* (याज्ञवल्क्यः, २०४७, १/१–२) । एवमेव बृहदारण्यकोपनिषदः प्रवक्ता याज्ञवल्क्यमुनिरेव चर्च्यमानां स्मृतिं रचयामासेत्युक्तौ वक्ष्यमाणं प्रमाणान्तरमपि प्राप्यते–*"ज्ञेयं चारण्यकमहं यदादित्यादवाप्तवान् । योगशास्त्रञ्च मत्प्रोक्तं ज्ञेयं योगमभीप्सता ॥"* (याज्ञवल्क्यः, २०४७, ३/११०) । एतादृशानां पद्यानां प्रक्षेपकत्वं मन्यमानस्य कीथस्योक्तिस्तु निराधारत्वादननुमोदनीया ।

मुनिर्याज्ञवल्क्यो राज्ञो जनकस्य विद्वत्सभायां विभिन्नैर्ऋषिभिर्ब्रह्मतत्त्वसम्बन्धे शास्त्रार्थं कृत्वा परां प्रतिष्ठामधिजगाम । राज्ञो जनकस्याचार्यत्वं स्वीकृत्य तस्मै ब्रह्मज्ञानमुपदिदेश । तेन न केवलं ब्रह्मतत्त्वमेवोपदिष्टं प्रत्युतो राज्यशासननीतिरप्युपदिष्टेति प्राच्यविद्यामर्मविदो विद्वांस आमनन्ति–

राजर्षिवर्यजनकस्य बृहत्सुराज्य-
शास्तिप्रशस्तिजनको मुनियाज्ञवल्क्यः ।
लोकानतीतृपदसौ विधिधारयैनं
धीधारया नृपमुनिं मुनिभिः समेतम् ॥ (पन्थी, २०४०, १/५) ।

स विभिन्नेषु यज्ञेष्वार्त्विज्यं स्वीकृत्य स्वयञ्चानेकान् यज्ञानायोजयामास । कनीयस्यां पत्न्यां कात्यायन्यां 'कात्यायन'नामानं पुत्रञ्च जनयामास । स मुनिः पिप्पलादमुनिसम्बन्धिन्या कयाचिद् घटनया भगवन्तं सदाशिवं शरणमन्विष्य तस्मात् 'योगीश्वरः' इत्युपाधिमासादयाञ्चकार । एवं विविधा-

भिरारोहावरोहपूर्णाभिर्लीलाभिस्तपःपूतां जीवनसरणिं गमयन्नन्ते ब्रह्मवादिन्यै ज्येष्ठभार्यायै मैत्रेय्यै स्वनिष्ठं ब्रह्मविद्यारूपं धनं कनिष्ठायै कात्यायन्यै भौतिकं धनं प्रदाय विधिवत् सन्न्यस्य पर्यन्ते ब्रह्मीभूतः (शर्मा, १९४०, २७) ।

याज्ञवल्क्यो मुनिर्मूलतो ब्रह्मविद्यासाधको वेदमन्त्राणां द्रष्टा तपस्वी दृश्यते तथापि स्वयं वेदा अपि काव्यमिति तत्रैवोक्तम्–*"अन्ति सन्तं न जहात्यन्ति सन्तं न पश्यति । देवस्य पश्य काव्यं न ममार न जीर्यति ॥"* (शर्मा, २०२८, १०/८ /३२) । पूर्वोपदर्शिताथर्ववेदप्रामाण्याद् याज्ञवल्क्यस्य प्रथमाभिव्यक्तिः शुक्लयजुर्वेदोऽपि काव्यमेव । मूलतो यज्ञविद्यास्वरूपो यजुर्वेदः स्थले स्थले पर्याप्तरूपेण रागात्मकताया अभिव्यञ्जनाद् गद्यकाव्यस्य रमणीयं रूपं बिभर्ति । निदर्शनार्थम्–*"सिनीवाली सुकपर्दा सुकुरीरा स्वौपसा । सा तुभ्यमदिते मह्योखां दधातु हस्तयोः ॥"* (उवटो महीधरश्च, १९८७, ११/५६) । अत्र वर्णनीयायां सिनीवाल्यां कार्यलिङ्गविशेषणसामर्थ्येन रतिमुग्धाया नायिकाया बिम्बः प्रतीयते येन निष्पन्ना समासोक्ती रमणीयं काव्यवपुः पुष्णाति ।

### (ग) अन्ये प्राचीना विद्वांसः

राज्ञो जनकस्य विद्वत्सभायां ब्रह्मतत्त्वसम्बद्धे शास्त्रार्थे सहभागिनी गार्गी वैदिककालीना मैथिली नारी वर्तते । अस्याश्चरितसम्बन्धे विस्तरेणोल्लेखस्यानुपलब्धेऽपि वचक्नुमुनेः पुत्रीरूपेण प्रसिद्धा (पोद्दारः, २०५७, ४७९) । सा बृहदारण्यकोपनिषदि राज्ञो जनकस्य विद्वत्सभायां याज्ञवल्क्येन सह जायमाने शास्त्रार्थे सशक्तरूपेण सहभागिनी वर्तते। तस्या ब्रह्मविषयकं ज्ञानमुच्चतमं दृश्यते। 'ब्रह्मलोकः कस्मिन् प्रोतो वर्तते ?' इति जिज्ञासां दमयितुं याज्ञवल्क्यः 'अतिप्रश्नो न कर्तव्यः' इति बलान्निवारयति । द्वितीयवारं शास्त्रार्थे प्रवृत्ता सा समेषां विदुषां प्रातिनिध्यं कुर्वती याज्ञवल्क्यस्य वैदुष्यं परीक्षते (पोद्दारः, २०५७, ४८१–८२) । तत्र सभायां सहभागिषु अश्वलः, आर्तभागः, लाह्यायनिभुज्युः, चाक्रायणोषस्तः, आरुणिरुद्दालकः, कौषीतकेयः कहोलः शाकल्य इत्येते सन्ति । गौतमो मुनिरपि याज्ञवल्क्यस्य समकालवर्ती आसीदिति शतपथब्राह्मणोक्तप्रसङ्गेन ज्ञायते । यथा–*"स होवाच । व्वरम्भवते गौतमाय दद्मऽइति स होवाच प्प्रतिज्ञातोऽम एष व्वरो यान्तु कुमारस्यान्तेव्वाचमभाषथास्ताम्मे ब्रूहीति ॥"* (वासुदेवब्रह्मभगवान्, १९४०, १४/५/२/ ८) । अस्यैव गौतमस्य वंशजः शतानन्दनामा मुनी राज्ञो जनकस्य पुरोहित आसीदिति उत्तररामचरितस्य साक्ष्येण ज्ञायते– *"गौतमश्च शतानन्दो जनकानां जनकानां पुरोहितः"* (भवभूतिः, १९६६, १/१६) । एवं मिथिलाक्षेत्रस्य गौरवभूता भूयांसः प्राचीना विद्वांस आर्यसंस्कृतेः संस्कृतविद्यायाः प्राचीनरूपायाः साहित्यविद्यायाश्च पल्लवने महनीयं योगदानं कृतवन्तः ।

## अर्वाचीनाः कवयः

वैदिककालादुत्तरवर्तिनः कवयः प्रकृतेऽर्वाचीनरूपेण गृह्यन्ते । एवं विभाजने समयदृशा किञ्चित् काठिन्ये भासमानेऽपि भाषिकदिशा एवं वर्गीकरणं युक्तिसङ्गतं प्रतीयते । अन्यथा विधागतादीनामाधारेण भेदे क्रियमाणेऽनपेक्षितो गौरवत्वदोष आपतेत । अत उत्तरवैदिककालवर्तिनां पूर्वोक्तक्षेत्रवर्तिनां साहित्यिकं योगदानं प्रकृतेऽध्ययनविषयतामानीयते ।

**(क) नान्यदेवः**

उपलब्धस्रोतसामाधारेण मैथिलेषु नान्यदेव एव लौकिकसंस्कृते काव्यरचयिता दृश्यते । स ११५४ तमे वैक्रमाब्दे साम्प्रतिकभारतस्य कर्णाटकप्रदेशात् नेपालस्य बारामण्डलान्तर्गतं सिम्रौनगढस्थं मिथिलाप्रदेशमागत्य तत्र राज्यारोहणं कृतवान् (कौण्डिन्न्यायनः, २०४८, ४) । स भरतमुनेर्नाट्यशास्त्रे 'सरस्वतीहृदयालङ्कार'नाम्नीं व्याख्यां कृतवान् । तस्या व्याख्याया उल्लेखः भाण्डारकरप्राच्यग्रन्थ-सङ्ग्रहालये विद्यत इति ज्ञायते (कौण्डिन्न्यायनः, २०४८, ४) ।

**(ख) चण्डेश्वरः**

बारामण्डलस्य सिम्रौनगढनिवासी चण्डेश्वरः ठक्कुरवंशीयस्तस्य राज्यस्य सान्धिविग्रहिकस्य वीरेश्वरस्य पुत्रो वर्तते । सोऽपि पैतृकपरम्परया प्राप्तं राज्ञो हरिसिंहदेवस्य सान्धिविग्रहिकपदम् अलङ्कुरुते स्म । तस्य स्थितिकालः १३७१ तमो वैक्रमाब्द उल्लिखित (कौण्डिन्न्यायनः, २०४८, ४) इति समयस्य पूर्वापरसीमायाः स्पष्टोल्लेखो न प्राप्यते । तेन कृत्यरत्नाकरः, पूजारत्नाकरः, दानरत्नाकरः, शुद्धिरत्नाकरः, विवादरत्नाकरः, व्यवहाररत्नाकरः, राजनीतिरत्नाकरः, दानवाक्यावलिः, शिववाक्यावलिरिति ग्रन्था रचिता (कौण्डिन्न्यायनः, २०४८, ४) इति ज्ञायते ।

**(ग) ज्योतिरीश्वरः**

ज्योतिरीश्वरो मध्यकाले नेपालस्य मिथिलाप्रान्ते विद्यमाने सिम्रौनगढराज्ये राज्ञो हरिसिंहदेवस्य सभापण्डित आसीदिति तस्यापि प्रायश्चण्डेश्वरसमकालिकता सिद्ध्यति (कौण्डिन्न्यायनः, २०४८, ५) । तस्य पिता धीरेश्वरनामा आसीत् । ज्योतिरीश्वरेण रचितं 'धूर्त्तसमागम'नामकं प्रहसनं नेपालस्य राष्ट्रियाभिलेखालये ताडपत्र-पञ्जीकृतसङ्ख्यायां १५३६ तमेऽङ्के सङ्गृहीतमस्ति ।

**(घ) विद्यापतिः**

विद्यापतेर्जन्म १४०७ तमे वैक्रमाब्दे तात्कालिकनेपालराज्यान्तर्वर्तिनि सम्प्रति भारतीयभूभागे विद्यमानाया मिथिलायास्तिरहुतप्रान्तान्तर्गते दरभङ्गामण्डले 'बिसपी'ग्रामेऽभूत् । तस्य पिता गणपतिठक्कुरस्तात्कालिकमिथिलाराज्यस्य राजधान्या गजरथपुरात् शासनं सञ्चालयतो राज्ञो गणेश्वर सिंहस्य राजसभापण्डित आसीत् । विद्यापतेः कवित्वप्रतिभया प्रभावितो राजा शिवसिंहः बिसपीति ग्रामं विद्यापतये दानरूपेणार्पितवानिति निम्नोद्धृतपङ्क्त्या ज्ञायते । दानपत्रमेतादृशं वर्तते–

स्वस्ति श्रीः गजरथपुरात् समस्तक्रियाविराजमानश्रीमद्रामेश्वरीवरलब्धप्रसादो भवानीभव-भक्तिभावपरायणो रूपनारायणो महाराजाधिराजः श्रीमच्छिवसिंहपादास्समरविजयिनो जरैलतप्यायां बिसपीग्रामवास्तव्यसकललोकान् भूकर्षकांश्च समादिशन्ति–ज्ञातमस्तु भवताम्, ग्रामोऽयमस्माभिः सप्रक्रियाभिर्नवजयदेवमहाराजपण्डितठक्कुरश्रीविद्यापतिभ्यः शासनीकृत्य प्रदत्तोऽतोयमेषां वचनकरी भूकर्षणादि कर्म करिष्यथेति ल. सं. २९३ श्रावणसुदि ७, गुरौ । (उपाध्यायः, २०२९, ख) ।

जीवनस्योत्तरार्धे आश्रयदातरि राजनि शिवसिंहे मुगलेन गयासुद्दीनतुगलकेन निर्दयमाक्रम्य रणाङ्गणे हते धर्मरक्षणाय लक्ष्मी-(औच्चार्यं रूपं लखिमा)-नामधेयीं महाराज्ञीं मातृरूपेण सहैवानीय नेपालस्य महोत्तरीजनपदस्य बनौलीग्रामे वसन् तस्यै प्रतिदिनं प्रातः भागवतपारायणं श्रावयति स्म ।

विद्यापतिर्मूलतो मैथिलीभाषायाः कविर्वर्तते तथापि स यदाकदा संस्कृतभाषायामि कविता रचयति स्म । तस्य संस्कृतकविताः प्रसन्नगम्भीरपदाः, नीत्युपदेशपराः प्रसादगुणपरिपूर्णाश्च विद्यन्ते । निदर्शनार्थमेका कविता प्रस्तूयते–

सेनाधनं नरेन्द्राणां कुकृतिः कुधियां धनम् । दैन्यं धनं दरिद्राणां धनं साधोर्यथार्थता ॥
धनं तृष्णावतः प्राणा वह्ने प्राणास्तथेन्धनम् । कामुकस्य स्त्रियः प्राणाः मानः प्राणा मनस्विनः ॥
शत्रवः पिशुना रोगाः स्वभावादपकारिणः । अप्रतिक्रियमाणास्तु प्रभवन्ति पदे पदे ॥ (मिश्रः, २०७४, ४२–४३) ।

**(ङ) महेशठक्कुरः**

महेशठक्कुरः खण्डबलावंशीयो जनकपुरनिवासी आसीदिति मन्यन्ते पण्डिताः (कौण्डिन्न्यायनः, २०४८, ११) । तस्यापरं नाम 'थेघठक्कुरः' आसीत् । तस्य सम्बन्धे धनुषाक्षेत्रे एकस्मिन् शिलालेखे वक्षमाणं पद्यमुट्टङ्कितं प्राप्यते–

आसीत् पण्डितमण्डलाग्रगणितो भूमण्डलाखण्डलो
जातः खण्डबलाकुले गिरिसुताभक्तो महेशः कृती ।
शाके रन्ध्रतुरङ्गमश्रुतिमहीसंलक्षिते हायने
वाग्देवीकृपयाशु येन मिथिलादेशः समस्तोऽर्जितः ॥ (कौण्डिन्न्यायनः, २०४८, ११) ।

प्रकृतपद्यानुसारेणानेन शास्त्रार्थे समस्ता मैथिला विद्वांसो विजिता इति ज्ञायते । तेन नाना ग्रन्थाः प्रणीता इत्युल्लेखश्च प्राप्यते (कौण्डिन्न्यायनः, २०४८, ११) । ते तु–आलोकदर्पणः, दायसारः, तिथितत्त्वचिन्तामणि इति सन्ति । तस्य समयः १६१३ तमो वैक्रमाब्द उल्लिखितः ।

**(च) वंशमणिः**

मध्यकालिकनेपालस्य भक्तपुरराज्याधिपतेर्जगज्ज्योतिर्मल्लस्य विद्वत्सभायां कविवरो वंशमणि-रन्यतमं रत्नमासीत् । जगज्ज्योतिर्मल्लस्य शासनकालः १६६८ तः १६८७ तमं वैक्रमाब्दं यावदासीत् । स जीवनस्योत्तरार्धे कान्तिपुरराज्याधिपतेः प्रतापमल्लस्याश्रयमधिजग इति वंशमणेः समयो वैक्रमाब्दस्य सप्तदशशतकोत्तरार्धो निश्चीयते ।

वंशमणिः विल्वपञ्चेति प्रसिद्धे झावंशे जातस्य भारद्वाजगोत्रीयस्य पण्डितस्य रामचन्द्रशर्मणो जयमतीनाम्न्यां धर्मपत्न्यामुत्पन्नो ब्राह्मणजातीय आसीत् । तस्य पूर्वजा जनकपुरवास्तव्या आसन् । सनातनधर्मावलम्बी शिवोपासकः स असाधारण्या प्रतिभया मण्डितः 'मणिमहोपाध्यायः' इत्युपाधिधारी कर्मकाण्ड-तन्त्र-व्याकरण-न्याय-सङ्गीतशास्त्राणामपि ज्ञाता आसीदिति तदीयाभी रचनाभिर्ज्ञायते । तेन प्रणीता हरिकेलिमहाकाव्यम् (सप्तदशसर्गात्मकं ९४२ पद्यैर्युतम्), चतुरङ्गतरङ्गिणी (बालबुद्धिक्रीडाविषयिणी), सङ्गीतभास्करः (नाम्नोऽनुसारी), गीतदिगम्बरम् (नाटकम्) इति चतस्रो रचनाः प्राप्यन्ते ।

हरिकेलिमहाकाव्यं काव्यशास्त्रीयप्रतिमानाधारेणोत्कृष्टं काव्यरत्नं विद्यते । रसानुगुण्येन संयोजिता शब्दशय्या, छन्दसां साङ्गीतिकं माधुर्यम्, भावस्य चरमाभिव्यक्तिः काव्यकलाया विलास इत्यादयः पक्षाः काव्यमिदमुत्कर्षयन्ति । अङ्गिरूपेण शृङ्गाररसनिबद्धे तत्र काव्ये यथावसरमन्येऽपि रसाः परिपोषकतया विन्यस्ताः । शृङ्गारस्य संयोग-विप्रलम्भात्मकोभयविधभेदयोरभिव्यञ्जनायां कवेः सफलता सम्मोहकारिणी

वर्तते । निदर्शनार्थं जलविहारवर्णनपरायां वक्षमाणायां पङ्क्तौ शृङ्गारमाधुरी विभावयितुं शक्यते–

विलासिनीनां जलकेलिकाले
नितम्बबिम्बस्थगितस्तटिन्याः ।
पतन् कुचाद्रौ पृथुलः प्रवाहः
शशंस सिन्धोरिव सेतुबन्धम् ॥ (वंशमणिः, २०५५, १२/१०) ।

बिम्बविधानेनोत्पादितानामलङ्काराणां सन्निवेशवशेन चारुतापरिवेषणेऽपि कविरसाधारणं सामर्थ्यं प्रदर्शयति । निदर्शनाय वक्ष्यमाणं पद्यं ग्रहीतुं शक्यते–

मरुन्मन्दं मन्दं वहति मतिवन्मन्थरमतेः
शशी दीव्यत्युच्चैरूपचित इव क्षोणितिलकः ।
ह्रसन्ते रोगार्ता इव रजनयश्चानुदिवसं
वशं कामस्याप्ता रतय इव सर्वा युवतयः ॥ (वंशमणिः, २०५५, ११/१३) ।

कृष्णे रतिमुग्धानां व्रजसुन्दरीणां सकृतककोपं जाताः संवादा काव्यरसिकानां चेतांसि वलादाकर्षन्ति। निदर्शनाय–

हारं हृदो हरसि कर्षसि मौलिरत्नं
यत्नं करोषि कुचकञ्चुकमोचनाय ।
व्यक्तं वद प्रकृतिसुन्दर नन्दसूनो
पाटच्चरोऽसि चरतां किमु कामुकोऽसि ? (वंशमणिः, २०५५, ११/१३) ।

एवं भावात्मकसौन्दर्याभिव्यञ्जने, काव्यकलाया विलासे भावकसमक्षं स्वकीयभावानां सम्प्रेषणे च महाकविर्वंशमणिर्न केवलं मिथिलाक्षेत्रीयेषु न च नैपालदेशीयेषु प्रत्युतः समस्तसंस्कृतकविषु स्वीयमसाधारणं वैशिष्ट्यं भजते । काव्यतत्त्वमर्मज्ञाः प्रकृतकाव्यसम्बन्धे साररूपेणोल्लिखन्तिअमृतवर्षिभिर्ललितललितैः सुपेशलैश्च पदैः, सहृदयहृदयझङ्कारिभिरतिगम्भीरैरर्थैः, सङ्गीत-धर्मिभिः कलात्मकैर्वृत्तैः.....हरिकेलिमहाकाव्यं कृष्णकाव्यपरम्पराया अद्वितीयं रत्नं संस्कृतमहाकाव्य-परम्परायां विशिष्टमवदानं नेपाले प्रणीतेषु सार्वभाषिकेषु महाकाव्येषु प्रथमं नेपालीयैः संस्कृतकविभिर्निर्मितेषु संस्कृतमहाकाव्येषु ज्येष्ठं श्रेष्ठञ्च वर्तते (ढकालः, २०५५, ६८) ।

**(छ) उदयानन्द-अर्यालः**

उदयानन्दो यद्यपि नेपालस्य गोरखाजनपदजन्मा वर्तते तथापि वसतिस्थानान्तरेण तस्य कर्मस्थलं सप्तरीमण्डलान्तर्गतो 'बैरबा'ग्रामो बभूवेतीह परिपठ्यते । तस्य पिता विश्वेश्वरनामाासीत् । तस्य स्थितिकालः १८१३ तः १८९४ तमो वैक्रमाब्दावधिर्वर्तते । तेन १८९१ तमे वैक्रमाब्दे 'दुःस्वप्नदोषहरस्तोत्रम्' रचितम् (कौण्डिन्न्यायनः, २०४८, २५) इति ज्ञायते ।

**(ज) दामोदरशर्मा झाः**

सप्तरीजनपदस्य 'सकरापुर'ग्रामनिवासी झोपाह्वो दामोदरशर्मा २००३ तमे वैक्रमाब्दे बालबोधरामायणं रचयामास ।

**(झ) जीवनाथझाः**

भारतस्य विहारप्रान्तस्य दरभङ्गामण्डलस्थ-'सरिबस'ग्रामस्थ-'ईशपुर'ग्रामटिकाभिजनः नेपालस्य प्रशासननियोगं स्वीकृत्य महोत्तरीमण्डलस्य मटिहानीस्थनेपालजनकपुरराजकीयमहाविद्यालये सेवारतो जीवनाथो झाः (१९६३–२०३८) श्रीमहेन्द्रप्रतापोदयम् नाम खण्डकाव्यं प्रणिनाय। जन्मना भारताभिजनस्यापि कवेस्तस्य कर्मस्थलं नैपालमिथिलाक्षेत्रं बभूवेति प्रकृते तस्य समावेशः समुचित एव । विविधवृत्तेषु पञ्चदशोत्तरशतं सङ्ख्याकैः पद्यै रचिते तदीये काव्ये राज्ञो महेन्द्रस्य, काष्ठमण्डपनगर्याः सम्बद्धस्थलानाञ्च मनोहारि वर्णनं प्राप्यते। काष्ठमण्डपवर्णनपरं निम्नोद्धृतं पद्यं कवेरनुप्रासप्रयोगक्षमतां सूचयति–

भाति यत्र निजभक्तपालिका शङ्करेण सह गुह्यकालिका।
पुण्यतीर्थवरयामदण्डपं द्योतते तदिह काष्ठमण्डपम् ॥ (झाः, २०२४, १२)।

**(ञ) पशुपतिः झाः**

महोत्तरीजनपदान्तर्गत-'साँढा'ग्रामाभिजनः कृष्णानन्दस्य मध्यमपुत्रः पशुपतिः १९८३ तमे वैक्रमाब्दे जात आसीत् । तेन ग्रामे प्राथमिकशिक्षाग्रहणानन्तरं जनकपुरस्थज्ञानकूपे, वाराणस्यां चाधीतम् । तस्य शिक्षकेषु विष्णुदेवः, जीवनाथः, कार्तिकेय इति प्रमुखा आसन्। भारतस्य पञ्जावप्रान्तस्य विभिन्नशिक्षणसंस्थासु प्राध्यापयता तेन सुदीर्घकालपर्यन्तं पञ्जावविश्वविद्यालयस्य विश्वबन्धुसंस्थानविद्यापीठे प्राध्यापनं कृतम् । स २०६२ तमे वैक्रमाब्दे दिवङ्गतः।

तेन रचितं 'नेपालसाम्राज्योदयम्' नाम काव्यं राष्ट्रभक्तिभावाभिव्यञ्जकं पञ्चदशसर्गात्मकं वर्तते। तत् खलु १९८० तमे खैष्टाब्दे पञ्जावतः प्रकाशितमस्ति । नेपालदेशस्य स्थापनासम्बद्धं प्राचीनं गौरवं वर्णयतस्तस्य कवित्वस्य स्थालीपुलाकन्यायेन परिज्ञानाय वक्ष्यमाणं पद्यं गवाक्षायते–

तत्सङ्गमोपान्तरतः प्रदेशे तपो विधातुं स्थिरचित्तशक्तिः।
नेनामकः सिद्धमुनिर्महात्मा संयोजयामास मनः समाधौ ॥ (झाः, १९८०, २/४)।

नेपालदेशस्य नामकरणे हेतुं दर्शयता कविना प्रोक्तम्–

तदाशिषा तत्समयस्य भूपोऽभवत् प्रजारञ्जनशक्तियुक्तः।
तेनास्य देशस्य महीप ! नाम जातं हि नेपाल इति प्रसिद्धम् ॥ (झाः, १९८०, २/५३)।

**(ट) रोहिणीवल्लभः पोखेलः**

नेपालस्य सिरहाजनपदान्तर्गत-भवानीपुरग्रामस्य बाखरा नाम्न्युपग्रामे लब्धजन्मा रोहिणी-वल्लभपोखेलः गणेशप्रसादस्य पौत्रो रघुनाथपोखेलस्य पुत्रो वर्तते । जनकपुरान्तर्गते किशोरीनगरे १९९५ तमे वैक्रमाब्दे उत्पन्नः स दीर्घकालपर्यन्तं त्रिभुवनविश्वविद्यालयस्य संस्कृताध्ययनसंस्थाने पश्चात् महेन्द्रसंस्कृतविश्वविद्यालये प्राध्यापनसेवया साहित्यरचनया च जीवनं यापितवान्। तेन विनतिपुष्पाञ्जलिः (सुमनःस्तवकः), अभिनवमेघदूतम् (प्रणयकाव्यम्), श्री ५ वीरेन्द्रोपायनम् (अभिनन्दनकाव्यम्), वकसंहारम् (खण्डकाव्यम्), मिथिलावैभवम्, नेपालगौरवम् इत्यादीनि काव्यानि बुद्धिविनोदादेः पद्यानुवादादयश्चेति प्रबन्धाकाराः सप्तदश ग्रन्था रचिताः।

पोखेलस्य कविताः भावप्रवणाः, परिष्कृताः, भावात्मकसौन्दर्याभिव्यञ्जिकाः पर्याप्तरूपेण कलाविलासिन्यश्च वर्तन्ते । तस्य काव्यात्मकपरिष्कारस्यावगमाय द्वे पद्ये उदाह्रियेते । मिथिलावर्णने

नगर्याः प्राचीनं गौरवमेवमवतारयति–

हृदोऽन्तरं ध्वान्तचयेन संवृतं विभास्य लोकस्य सतोऽस्य चिन्मयम् ।
सुचिन्तनोद्योगपराऽमलाशया जयत्युदारा मिथिलाऽऽदरास्पदा ॥ (पोखे्रलः, २०४२, १४) ।

जनकपुरनगर्या वर्णने कवेः कला विशेषेण मुखरिता दृश्यते । निदर्शनाय यथा–

पीयूषपूरति पुराऽऽचरणप्रवृत्ति र्वृत्तिर्हिमांशवति चात्र कलोपपत्तिः ।
ज्योत्स्नाति पुष्करलसल्ललिताशयेयं तच्चाद्भुतोदयततिः परमास्पदैवम् ॥ (पोखे्रलः, २०४२, १४) ।

**(ठ) अमृतनाथमिश्रः**

पौरस्त्याचारविद्याया धुरीणो विद्वान् अमृतनाथमिश्रो विष्णुदेवमिश्रस्य धर्मपत्न्याः सृजनीदेव्या गर्भात् प्रथमपुत्ररूपेण १९७७ तमे वैक्रमाब्दे मार्गशुक्लद्वितीयायां मिथिलाक्षेत्रस्य हृत्केन्द्रायितस्य जनकपुराञ्चलस्य 'महोत्तरी' जनपदगत-'बनौली' ग्रामे जनिमलभत (पाण्डेयः २०७३, १२) । प्राथमिकीं शिक्षां ग्राम एवासादितोऽसौ वाराणस्यां नव्यव्याकरणे आचार्यपर्यन्तमधीतचर आसीत् । मूलतः पुराणप्रवाचकः समाजसेवी च सन्नपि यदाकदा कवितां रचयति स्म । तेन रचितानां सङ्कलितानाञ्च रुचिरपद्यानां सङ्ग्रहः 'अमृतभावप्रवाह' नाम्ना शीर्षकीकृत्य प्रकाशितोऽस्ति । तस्य कविताशैली सरला सत्यपि रसमयी व्यञ्जनाप्रधाना च वर्तते । तस्य विदुषो रसमयकवित्वज्ञानायैकं पद्यमुद्ध्रियते–*"कथमेतौ कुचौ हन्त ! पतितौ तव सुन्दरि ! अधः पश्य खनन् मूढः पतन्ति गिरयोऽपि च ॥"* (मिश्रः, २०७४, ४८) ।

## निष्कर्षः

वैदिककालात् प्रचलिता मिथिलाक्षेत्रीया संस्कृतकाव्यप्रणयनपरम्परा समयेन विविधं विषयवस्तु विभिन्नाः शैलीश्चात्मसात्कुर्वती प्रचलिता दृश्यते । सम्प्रति संस्कृतकाव्यप्रणयनपरम्परायां क्षीणायाम् अपि कतिपया प्रतिभा दृश्यन्ते । मुख्यतो मिथिलायाः प्राचीनं गौरवं *शुक्लयजुर्वेदसंहिताया* माध्यमेन ज्ञवल्क्येन संरक्षितं तस्या विश्वगुरुत्वं वर्तते । मल्लशासनकाले वंशमणिशर्मणा प्रणीतं *हरिकेलि* महाकाव्यं मैथिलकविप्रणीतं विश्वस्तरीयं समग्रनैपालसंस्कृतजगतो गौरवपूर्णं महाकाव्यं वर्तते । मिथिलायां सम्प्रत्यप्युदीयमानाः सुरभारत्यां सर्जनरताः बह्व्यो नूतनाः प्रतिभाः क्षेत्रस्यास्य दायसंरक्षणे क्षमतामर्जयिष्यन्तीति विश्वसितुं शक्यते ।

**कृतज्ञताज्ञापनम्**

अस्मिन्ननुसन्धानकार्ये महत्त्वपूर्णैः परामर्शैरनुग्रहीतॄन् विषयविज्ञान् प्रति हृदयतः कृतज्ञतां निवेदयामि ।

**सन्दर्भसामग्रीसूची–**

आचार्यः, श्रीरामशर्मा (सन् १९७५ सन्). सम्पा., विष्णुपुराणम् (द्वितीयः खण्डः), सं., संशोधितम्, बरेली : संस्कृतिसंस्थान ।

उपाध्यायः, कृष्णप्रसादः (२०२९). "प्रस्तावना" *विद्यापति पदावलीको नेपाली अनुवाद,* काठमाडौं : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, पृ. क–घ ।

उवटो महीधरश्च (सन् १९८७). व्याख्या., *शुक्लयजुर्वेदसंहिता,* सं., पुनर्मुद्रितम्, दिल्ली : मोतीलाल बनारसीदास ।

कौण्डिन्न्यायनः, शिवराजः (२०४८). *कतिपयनैपालसंस्कृतग्रन्थकारपरिचयः*, काष्ठमण्डपनगरम् : स्वाद्ध्यायशाला ।

झाः, जीवनाथः (२०२४). *श्रीमहेन्द्रप्रतापोदयम्,* पाको पोखल्ड्याङ्ग, काठमाडौँ : नेपाली साहित्य संस्थान ।

झाः, पशुपतिः (सन् १९८०). *नेपालसाम्राज्योदयम्,* पञ्जाव : सीतादेवी झा ।

ढकालः, वेणीमाधवः (२०५५). "हरिकेलिनवनीतम् भूमिका" वंशमणिशर्मप्रणीतं *हरिकेलिमहाकाव्यम्,* टीका., वेणीमाधवढकालः, दाङ : महेन्द्रसंस्कृतविश्वविद्यालयः, पृ. १–६८ ।

ढकालः, वेणीमाधवः (२०७३). टीकाकारः, *श्रीमद्देवीभागवत महापुराणम्* (प्रथमः खण्डः), काठमाडौँ : विद्यार्थी पुस्तक भण्डार ।

पन्थी, टीकारामः (२०४०). *नेनेपालः,* गुल्मी : किरणपुस्तकालयः ।

पन्थी, टीकारामः (२०६२). *सांस्कृतिक चिन्तन,* गुल्मी : किरण पुस्तकालय ।

पन्थी, टीकारामः (दिनाङ्कादेः सङ्केतो न दत्तः). *मिथिला र मैथिली,* (अप्रकाशितं कार्यपत्रम्), पृ. १–३ ।

पाण्डेयः गणेशः (२०७३). "वैदुष्य-सदाचारयोर्वेणी : अमृतनाथमिश्रः", *गोरखापत्र,* (२०७३ मार्ग १५), नयाँ नेपाल, सम्पा., पुष्कर माथेमा, काठमाडौँ : गोरखापत्रसंस्थान, पृ. १२ ।

पोखे्रलः, रोहिणीवल्लभः (२०४२). *मिथिलासौरभम्,* वाराणसी : श्रीमती रत्नाकुमारी देवी ।

पोद्दारः, हनुमानप्रसादः (२०५७). सम्पा., *कल्याण* (उपनिषदङ्कः), गोरखपुर : गीताप्रेस ।

बरालः, टीकादत्तः (२०६८). *तत्सम नेपाली व्युत्पत्ति शब्दकोश,* काठमाडौँ : विद्यार्थी पुस्तक भण्डार ।

भट्टाचार्यः, तारानाथतर्कवाचस्पतिः (सन् १९७०). *वाचस्पत्यम्* (षष्ठो भागः), सं., तृतीयम्, वाराणसी : चौखम्बा संस्कृत सीरिज अफिस ।

भवभूतिः (सन् १९६६). *उत्तररामचरितम्, व्याख्या.,* शेषराजशर्मा रेग्मीः, सं., पञ्चमम्, वाराणसी : चौखम्बा संस्कृत सिरिज अफिस ।

महर्षिवेदव्यासः (२०१०). *श्रीमद्भागवतमहापुराणम्,* सं., षष्ठम्, गोरखपुर : गीताप्रेस ।

मिश्रः, अमृतनाथः (२०७४). *अमृतभावप्रवाह,* सम्पा., शशिनाथझा दिनेशचन्द्रमिश्रश्च, वीरगञ्ज : भगवान मिश्र ।

मिश्रः, नारायणः (२०४७). "प्रस्तावना" (भूमिका), योगीश्वरयाज्ञवल्क्यरचिता *याज्ञवल्क्यस्मृतिः,* सं., चतुर्थम्, वाराणसी : चौखम्भा संस्कृत संस्थान, पृ. १–२६ ।

याज्ञवल्क्यः(२०४७). *याज्ञवल्क्यस्मृतिः,*व्याख्या.,विज्ञानेश्वरः उमेशचन्द्रपाण्डेयश्च,सं.,चतुर्थम्,वाराणसी:चौखम्भा संस्कृत संस्थान ।

वंशमणिः (२०५५). *हरिकेलिमहाकाव्यम्,* (११–१३ सर्गात्मकम्), व्याख्या., वेणीमाधवढकालः, दाङ : महेन्द्र संस्कृत विश्वविद्यालयः ।

वासुदेवब्रह्मभगवान् (सन् १९४०). (प्रकाशकः) *शतपथब्राह्मणम्* (पञ्चमो भागः), बम्बई : श्रीलक्ष्मीवेङ्कटेश्वरस्टीम् ।

शर्मा, जयदेवः (२०२८). भाष्यकारः, *अथर्ववेदसंहिता,* सं., पञ्चमम्, अजमेर : आर्य साहित्य मण्डल लिमिटेड ।

शर्मा, श्रीधरः (सन् १९४०). "उपोद्घातः" याज्ञवल्क्यमुनिविरचितम् *शतपथब्राह्मणम्* (पञ्चमभागस्य भूमिका), सम्पा., वासुदेवब्रह्मभगवान्, बम्बई : श्रीलक्ष्मीवेङ्कटेश्वर स्टीम्, पृ. १–३६ ।

स्याररराजाराधाकान्त देवबहादुरः (सन् २०१५). *शब्दकल्पद्रुमः,* वाराणसी : चौखम्बा सुरभारती प्रकाशन ।